श्री गणेशाय नमः
ॐ श्री पञ्चवदनायाञ्जनेयाय नमः
ॐ अस्य श्रीपंचमुख हनुम्त्कवचमंत्रस्य
ब्रह्मा ऋषि: !

---

गायत्री छंद:

पंचमुख विराट हनुमान देवता ! ह्रीं बीजम् !

श्रीं शक्ति: ! क्रौ कीलकम् ! क्रूं कवचम !

क्रै अस्त्राय फट ! इति दिग्बंध: !

---

!! श्री गरुण उवाच !!

अथ ध्यानं प्रवक्ष्यामि
श्रुणु सर्वांगसुंदर !
यत्कृतं देवदेवेन ध्यानं
हनुमंत: प्रियम !! १ !!

पंचकक्त्रं महाभीमं
त्रिपंचनयनैर्युतम !
बाहुभिर्दशभिर्युक्तं
सर्वकामार्थसिद्धिदम !! २ !!

पूर्वतु वानरं वक्त्रं
कोटिसूर्यसमप्रभम !
दंष्ट्राकरालवदनं
भ्रुकटीकुटिलेक्षणम !! ३ !!

अस्यैव दक्षिणं वक्त्रं
नागरसिंहं महाभ्दुतम !
अत्युग्रतेजोवपुष्पंभीषणम
भयनाशनम !! ४ !!

पश्चिमं गारुडं वक्त्रं
वक्रतुंड महाबलम !
सर्वनागप्रशमनं
विषभूतादिकृन्तनम !! ५ !!

उत्तरं सौकरं वक्त्रं
कृष्णं दिप्तं नभोपमम !
पातालसिंहवेतालज्वररोगादिकृन्
नम !! ६ !!

ऊधर्वं हयाननं घोरं
दानवान्तकरं परम !
येन वक्त्रेण विप्रेंन्द्र
तारकाख़्यमं महासुरम !! ७ !!

जघानशरणं
तस्यात्सर्वशत्रुहरं परम !
ध्यात्वा पंचमुखं रुद्रं
हनुमनतं दयानिधिम !! ८ !!

खड्गं त्रिशुलं खट्वांगं
पाशमंकुशपर्वतम !
मुष्टिं कौमोदकीं वृक्षं
धारयन्तं कमण्डलुं !! ९ !!

भिन्दिपालं ज्ञानमुद्रा
दशभिर्मुनिपुंगवम !

एतान्यायुधजालानि
धारयन्तं भजाम्यहम !! १० !!

प्रेतासनोपविष्टं तं
र्वाभरण्भुषितम !
दिव्यमाल्याम्बरधरं दिव्यगन्धानन‌ु लेपनम
सर्वाच्श्रर्यमयं देवं हनुमद्विव्श्रतोमुखम
!!११!!

पंचास्यमच्युतमनेकविचित्रवर्णवक्त्रं
शशांकशिखरं कपिराजवर्यम !
पीताम्बरादिमुकुटै रूप शोभितांगं
पिंगाक्षमाधमनिशं मनसा स्मरामि !! १२ !!

मर्कतेशं महोत्राहं सर्वशत्रुहरं परम !
शत्रुं संहर मां रक्ष श्री मन्ऩपदमुध्दर !! १३ !!

ॐ हरिमर्कट मर्केत मंत्रमिदं
परिलिख्यति लिख्यति वामतले !
यदि नश्यति नश्यति शत्रुकुलं
यदि मुंच्यति मुंच्यति वामलता !! १४ !!

ॐ हरिमर्कटाय स्वाहा
ॐ नमो भगवते पंचवदनाय पूर्वकपिमुखाय
सकलशत्रुसंहारकाय स्वाहा !

ॐ नमो भगवते पंचवदनाय दक्षिणमुखाय
करालवदनाय नरसिंहाय
सकलभूतप्रमथनाय स्वाहा !

ॐ नमो भगवते पंचवदनाय पश्चिममुखाय
गरुडानाय सकलविषहराय स्वाहा !

ॐ नमो भगवते पंचवदनाय उत्तरमुखाय
आदिवराहाय सकलसंपत्कराय स्वाहा !

ॐ नमो भगवते पंचवदनाय उधर्वमुखाय
हयग्रीवाय सकलजनवशकराय स्वाहा !

ॐ अस्य श्री पञ्चमुखहनुमन्मन्त्रस्य
श्रीरामचन्द्र ऋषिः !
अनुष्टुप्छन्दः ! पञ्चमुखवीरहनुमान् देवता !

हनुमानिति बीजम् !
वायुपुत्र इति शक्तिः !
अञ्जनीसुत इति कीलकम् !
श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे
जपे विनियोगः !
इति ऋष्यादिकं विन्यसेत् !

ॐ अञ्जनीसुताय अङ्गुष्ठाभ्यां नमः !
ॐ रुद्रमूर्तये तर्जनीभ्यां नमः !
ॐ वायुपुत्राय मध्यमाभ्यां नमः !
ॐ अग्निगर्भाय अनामिकाभ्यां नमः !
ॐ रामदूताय कनिष्ठिकाभ्यां नमः !
ॐ पञ्चमुखहनुमते
करतलकरपृष्ठाभ्यां नमः !
इति करन्यासः !

ॐ अञ्जनीसुताय हृदयाय नमः !
ॐ रुद्रमूर्तये शिरसे स्वाहा !
ॐ वायुपुत्राय शिखायै वषट् !
ॐ अग्निगर्भाय कवचाय हुम् !
ॐ रामदूताय नेत्रत्रयाय वौषट् !
ॐ पञ्चमुखहनुमते अस्त्राय फट् !

पञ्चमुखहनुमते स्वाहा !
इति दिग्बन्धः !

अथ ध्यानम्

वन्दे वानरनारसिंहखगराट्क्रोडाश्ववक्त्रान्वितं
दिव्यालङ्करणं त्रिपञ्चनयनं
देदीप्यमानं रुचा !
हस्ताब्जैरसिखेटपुस्तकसुधाकुम्भाङ्कुशाद्रिं हलं
खट्वाङ्गं फणिभूरुहं दशभुजं सर्वारिवीरापहम् !

अथ मन्त्रः

ॐ श्रीरामदूतायाञ्जनेयाय
वायुपुत्राय महाबलपराक्रमाय
सीतादुःखनिवारणाय लङ्कादहनकारणाय
महाबलप्रचण्डाय फाल्गुनसखाय
कोलाहलसकलब्रह्माण्डविश्वरूपाय
सप्तसमुद्रनिर्लङ्घनाय पिङ्गलनयनायामितविक्रमाय
सूर्यबिम्बफलसेवनाय दुष्टनिवारणाय
दृष्टिनिरालङ्कृताय
सञ्जीविनीसञ्जीविताङ्गदलक्ष्मणमहाकपिसैन्यप्राणदाय
दशकण्ठविध्वंसनाय रामेष्टाय
महाफाल्गुनसखाय सीतासहित- रामवरप्रदाय
षट्प्रयोगागमपञ्चमुखवीरहनुमन्मन्त्रजपे विनियोगः !

ॐ हरिमर्कटमर्कटाय बंबंबंबंबं
वौषट् स्वाहा !
ॐ हरिमर्कटमर्कटाय फंफंफंफंफं
फट् स्वाहा !
ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखें
मारणाय स्वाहा !
ॐ हरिमर्कटमर्कटाय लुंलुंलुंलुंलुं

आकर्षितसकलसम्पत्कराय स्वाहा !
ॐ हरिमर्कटमर्कटाय धंधंधंधंधं
शत्रुस्तम्भनाय स्वाहा !
ॐ टंटंटंटंटं कूर्ममूर्तये पञ्चमुखवीरहनुमते
परयन्त्रपरतन्त्रोच्चाटनाय स्वाहा !

ॐ कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं
तंथंदंधंनं पंफंबंभंमं यंरंलंवं शंषंसंहं
ळंक्षं स्वाहा !
इति दिग्बन्धः !

ॐ पूर्वकपिमुखाय पञ्चमुखहनुमते
टंटंटंटंटं सकलशत्रुसंहरणाय स्वाहा !

ॐ दक्षिणमुखाय पञ्चमुखहनुमते
करालवदनाय नरसिंहाय
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः
सकलभूतप्रेतदमनाय स्वाहा !
ॐ पश्चिममुखाय गरुडाननाय
पञ्चमुखहनुमते मंमंमंमंमं
सकलविषहराय स्वाहा !

ॐ उत्तरमुखायादिवराहाय लंलंलंलंलं
नृसिंहाय नीलकण्ठमूर्तये
पञ्चमुखहनुमते स्वाहा !

ॐ उर्ध्वमुखाय हयग्रीवाय रुंरुंरुंरुंरुं रुद्रमूर्तये
सकलप्रयोजननिर्वाहकाय स्वाहा !

ॐ अञ्जनीसुताय वायुपुत्राय महाबलाय
सीताशोकनिवारणाय
श्रीरामचन्द्रकृपापादुकाय

महावीर्यप्रमथनाय ब्रह्माण्डनाथाय
कामदाय पञ्चमुखवीरहनुमते स्वाहा !

भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिन्यन्तरिक्षग्रह-
परयन्त्रपरतन्त्रोच्चटनाय स्वाहा !
सकलप्रयोजननिर्वाहकाय पञ्चमुखवीरहनुमते
श्रीरामचन्द्रवरप्रसादाय जंजंजंजंजं स्वाहा !

इदं कवचं पठित्वा तु महाकवचं पठेन्नरः !
एकवारं जपेत्स्तोत्रं सर्वशत्रुनिवारणम्
!! १५ !!

द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनम् !
त्रिवारं च पठेन्नित्यं सर्वसम्पत्करं शुभम्
!! १६ !!

चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम् !
पञ्चवारं पठेन्नित्यं सर्वलोकवशङ्करम्
!! १७ !!

षड्वारं च पठेन्नित्यं सर्वदेववशङ्करम् !
सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम्
!! १८ !!

अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम् !
नववारं पठेन्नित्यं राजभोगमवाप्नुयात्
!! १९ !!

दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम् !
रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवेद्ध्रुवम्
!! २० !!

निर्बलो रोगयुक्तश्च महाव्याध्यादिपीडितः !
कवचस्मरणेनैव महाबलमवाप्नुयात् !! २१ !!

!! इति श्रीसुदर्शनसंहितायां श्रीरामचन्द्रसीताप्रोक्तं
श्रीपञ्चमुखहनुमत्कवचं सम्पूर्णम् !!